श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री करुणाकराचार्य विरचिता

# ॥ श्रीनङ्गैनल्लूर् हयग्रीवप्रपत्तिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनङ्गैनल्लूर् हयग्रीवप्रपत्तिः ॥

मातर्लक्ष्मि ! तुरङ्गवक्त्रदयिते ! तस्याङ्कभूमौ स्थिते !
प्रातस्त्वां शरणङ्गतोऽस्मि नितरां कृत्यैर्मदीयैस्समैः।
भीतस्संप्रति हा ! प्रसन्नमिह तं कुर्याः पतिं ते मयि
का वान्या शरणं ममाऽद्य करुणामूर्तिं श्रियं त्वां विना॥ १ ॥

नानापराधनिवहानहमस्मि कृत्वा
नाथ ! त्वदीय चरणौ शरणं प्रपन्नः।
श्रीवाजिवक्त्र ! वितथानि न ते प्रकुर्या
वेलाधनञ्जयरथावनिघोषणानि॥ २ ॥

योऽजायमान इति सर्वविधोऽपि जातः
त्वं वर्ण्यसे सकलचेतनरक्षणाय।
योषित्सुपत्तनमितोऽसि मदर्थमेव
तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये॥ ३ ॥

सत्याचलादिषु भवत्प्रतिकूलवृत्ति
दैत्यद्वयं च भवतः पदमूल एव।
भातीति धैर्यमवलम्ब्य कृतापराधः
तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये॥ ४ ॥

तादृङ्निहीनमपि कञ्चन धीवरं त्वं
सौमित्रतुल्यमकरोर्भगवन् स रामः।
भूत्वा पुरा तदवगत्य धृतिं दधानः
तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये॥ ५ ॥

www.prapatti.com

चापल्यभूमिमसुतोऽपि कपिं च कंश्चित्
    संमानयन्नभव इत्यथ राघवत्वम्।
धृत्वा पुरा तदवगत्य धृतिं दधानः
    तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये॥ ६ ॥

दत्वा श्रुतीश्च महिता अथ तस्य तासु
    नष्टासु रक्षितवति त्वयि दिङ्मुखोऽसौ।
वत्सापहारवृजिनोऽप्यभिरक्षितोऽभूत्
    तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये॥ ७ ॥

मातुश्च कुण्डलयुगं रिपुतोऽथ नीत्वा
    प्रत्तं त्वयाऽऽप्य भगवन् ! तव पुष्पमेकम्।
पत्न्या अदादपि न सोऽप्यथ रक्षितोऽभूत्
    तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये॥ ८ ॥

शुद्धान्तलक्ष्यमकरो रिपुशस्त्रमेकं
    आच्छिद्य पाण्डुतनयं च तदीयसूतः।
श्रुत्वा चरित्रमिदमस्मि धृतिं दधानः
    तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये॥ ९ ॥

मिथ्यां त्वदर्थमभिगीय बभूव दध्नो
    भाण्डेन तेन सहितो भगवन् ! स मुक्तः।
आभीरवृद्ध इह कृष्णतनोर्विहारे
    तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये॥ १० ॥

तर्कर्षिदारकृतपापततिस्समस्ता
    त्वत्पादधूलिनिहतेति कथां निशम्य।
तत्पापजैत्रबहुपापकृतौ पटुस्सन्
    तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये॥ ११ ॥

सूर्यात्मजाय कपये कपिराज्यदाता
    विस्रम्भणाय चपलस्य च ते परीक्षे।

www.prapatti.com

स्वीकृत्य राघवतनुस्त्वमपालयस्तं
    तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये॥ १२ ॥

पादू प्रदाय भरतं ननु सान्त्वयंस्त्वं
    तद्देशवासिजनतामखिलाञ्च मुक्ताम्।
कृत्वा बभूविथ मुदा परयाऽथ युक्तः
    तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये॥ १३ ॥

श्रीभाष्यकारविनुतो भगवन् ! तदानीं
    मीनोत्तरोडुनि वरं ननु रङ्गधाम्नि।
तस्मा अदास्तु महितं तदवेत्य हृप्तः
    तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये॥ १४ ॥

मादृक्जनस्य सततं दृढपापबुद्धेः
    वेदान्तदेशिकगुरुस्त्वगदं बभाषे।
न्यासं तवाङ्घ्रियुगयोरहमद्य देव !
    तद्वाजिवक्त्र ! चरणौ शरणं प्रपद्ये॥ १५ ॥

विद्यानिधिस्स भगवन् ! विधिसेव्यमानो
    विद्याभिरेष न हि ते भजनेऽस्मि शक्तः।
विद्याङ्गकर्मकरणेप्यथ बुद्धियोगे
    विद्यासुसङ्ख्यवचनैः शरणक्रियाऽतः॥ १६ ॥

विना वाजिवक्त्रं न नाथो न नाथः सदा वाजिवक्त्रं स्मरामि स्मरामि।
हरे वाजिवक्त्र प्रसीद प्रसीद प्रियं वाजिवक्त्र प्रयच्छ प्रयच्छ॥ १७ ॥

॥ इति श्रीनङ्गैनल्लूर् हयग्रीवप्रपत्तिः समाप्तः ॥

www.prapatti.com